# विविधप्रश्नावलिः - 1

1. **प्रश्नानाम् एकपदेन उत्तरं लिखत—**

क. मनसा किं करणीयम्?

ख. वराहमिहिरस्य पितुः नाम किम्?

ग. कस्मिन् मासे गणतन्त्रदिवसः भवति?

घ. विद्या कीदृशी भवेत्?

ङ. ओरछानगरस्य स्थापना केन कृता?

च. नरेन्द्रनाथस्य पितुः नाम किम् आसीत्?

छ. गजः कां नाशितवान्?

ज. मित्रं कदा जानीयात्?

2. **प्रश्नानाम् एकवाक्येन उत्तरं लिखत—**

क. कुत्र चरणीयम्?

ख. वराहमिहिरेण के ग्रन्थाः विरचिताः।

ग. राष्ट्रभक्तैः का प्रतिज्ञा कृता?

घ. अनभ्यासे किं विषम्?

ङ. हरदौलमहाराजः किमर्थं विषपानं कृतवान्?

च. शिकागोनगरे विश्वधर्मसम्मेलने भारतस्य प्रतिनिधिः कः अभवत्?

छ. मण्डूकः मक्षिकां किम् उपायम् उक्तवान्?

3. **कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत—**

क. वराहमिहिरः अध्ययनं समाप्य ............ आगतः। (उज्जयिनीम्/पाटलिपुत्रनगरम्)

ख. प्रतिग्रहणस्य कामनां ......................। (कुरु/मा कुरु)

ग. उद्योगे ................. दारिद्र्यम्। (अस्ति/नास्ति)

घ. केशवदासः ................ कविः आसीत्। (संस्कृतभाषायाः/हिन्दीभाषायाः)

ङ. राज्येषु ................. प्रातिनिध्यं वहन्ति। (भोपालम्/राज्यपालाः)

च. लोकहितं .......................। (वदनीयम्/करणीयम्)

छ. मत्तगजः ................ पतितः। (अङ्के/पङ्के)

4. **अधोलिखितपदानां विलोमानि लिखत—**

| | | | |
|---|---|---|---|
| क. | सततम् | ख. | तिमिरः |
| ग. | उत्कर्षस्य | घ. | अमृतम् |
| ङ. | गुणेषु | च. | मित्रम् |

5. **पदानां समानार्थकं पदानि लिखत—**

| | | | |
|---|---|---|---|
| क. | बुद्धिः | ख. | मार्गदर्शनम् |
| ग. | पुष्पाणि | घ. | वीरः |
| ङ. | नृपः | च. | महार्णवम् |

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत—**

क. बालकोऽजायत

ख. वर्द्धिताश्च

ग. अत्रैव

घ. अद्यावधि

ङ. एवाकर्म

7. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत—**

| | | | |
|---|---|---|---|
| क. | परोपकारः | ख. | पर्यावरणविज्ञानम् |
| ग. | धनाभावेन | घ. | क्षीरविवर्जिताः |
| ङ. | शिल्पकार्यम् | च. | गणतन्त्रदिवसः |

8. **उचितं मेलयत—**

| | (अ) | (ब) |
|---|---|---|
| क. | ऐक्यबलेन | वन्दे मातरम् |
| ख. | राष्ट्रियं गीतम् | वराहमिहिरः |
| ग. | राष्ट्रगानम् | किमाटोपैः प्रयोजनम् |
| घ. | आदित्यदासस्य पुत्रः | जनगणमन–अधिनायक जय हे |
| ङ. | गुणेषु क्रियतां यत्नः | मत्तगजः मारितः |

### 9. धातुरूपाणां समक्षं धातु-लकार-पुरुष-वचनानि च लिखत—

| | धातुरूपम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| क. | अस्ति | | | | |
| ख. | कुर्वन्ति | | | | |
| ग. | आसन् | | | | |
| घ. | वर्तते | | | | |
| ङ. | भवन्ति | | | | |
| च. | विद्यते | | | | |

### 10. शब्दरूपाणां समक्षं मूलशब्द-विभक्ति-लिङ्ग-वचनानि च लिखत—

| | शब्दरूपम् | मूलशब्दः | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|---|
| क. | ज्ञानम् | | | | |
| ख. | बालकः | | | | |
| ग. | तस्मिन् | | | | |
| घ. | वने | | | | |
| ङ. | घण्टाभिः | | | | |
| च. | जलस्य | | | | |

### 11. अधोलिखितगद्यांशं पठित्वा उत्तराणि लिखत—

मम परिसरे एकं पुष्पोद्यानं वर्तते। तत्र विविधवर्णानि पुष्पाणि पर्यटकानां चित्तं मोदयन्ते। उद्यानस्य नातिदूरे हिन्दीभाषायाः प्रसिद्धकवेः केशवदासस्य स्थानमस्ति। षोडशशताब्दात् आरभ्य मम निर्माणम् अद्यावधि चलति एव। परं सर्वाधिकं निर्माणकार्यं महाराजवीरसिंहप्रथमस्य शासने अभवत्।

क. मम परिसरे किं वर्तते?

ख. पर्यटकानां चित्तं कानि मोदयन्ते?

ग. सर्वाधिकं निर्माणकार्यं कस्य शासने अभवत्?

घ. केशवदासः कस्याः भाषायाः कविः आसीत्?

**अथवा**

अस्ति उज्जयिन्याः निकटे 'कपित्थ' (कायथा) नामाख्यो ग्रामः। तत्र आदित्योपासकः 'आदित्यदासः' नामा कश्चित् विप्रः प्रतिवसति स्म। तस्य गृहे 'वराहमिहिरः' नामा बालकोऽजायत। वराहमिहिरस्य जन्म 499 (नवनवत्यधिक चतुश्शतके) ख्रिस्ताब्दे सञ्जातम्।

बालकः वराहमिहिरः स्वकीयपित्रा एव ज्यौतिषविद्यामध्यगच्छत्। ततः सः पाटलिपुत्रनगरं गत्वा प्रसिद्धखगोलशास्त्रज्ञात् आर्यभटात् खगोलशास्त्रस्याध्ययनं कृतवान्।

क. 'कपित्थ' नामाख्यो ग्रामः कस्याः निकटे अस्ति?

ख. आदित्यदासस्य पुत्रस्य नाम किम्?

ग. वराहमिहिरस्य जन्म कदा अभवत्?

घ. वराहमिहिरः कस्मात् खगोलशास्त्रस्याध्ययनं कृतवान्?

**12. अधोलिखितं पद्यं पठित्वा उत्तराणि लिखत—**

उद्योगे नास्ति दारिद्र्यं जपतः नास्ति पातकम्।
मौने च कलहो नास्ति नास्ति जागरिते भयम्॥

क. दारिद्र्यं कुत्र नास्ति?

ख. कस्य पातकं नास्ति?

ग. कलहः कुत्र नास्ति?

घ. जागरिते किं नास्ति?

**अथवा**

न भोगभवने रमणीयम्, न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्, लोकहितं मम करणीयम्॥

क. कुत्र न रमणीयम्?

ख. कुत्र न शयनीयम्?

ग. अहर्निशं किं करणीयम्?

घ. मम किं करणीयम्?

**13. कोष्ठकात् उचितशब्दं चित्वा लिखत—**

क. स्वामिविवेकानन्दस्य गुरुः .............आसीत्? (रामकृष्णपरमहंसः/वेदव्यासः/रामः/कृष्णः)

ख. वराहमिहिरः ............. आसीत्। (अज्ञः/विज्ञः/कालज्ञः/नीतिज्ञः)

ग. मनसा सततम्..........। (वदनीयम्/करणीयम्/स्मरणीयम्/रमणीयम्)

घ. ............. निर्धनस्य विषमस्ति। (रोगः/भोगः/योगः/नियोगः)

ङ. ओरछानगरम् ............. अस्ति। (भोपालमण्डले/टीकमगढमण्डले/रायसेनमण्डले/मन्दसौरमण्डले)

**14. भिन्नप्रकृतिकं शब्दं चिनुत—**

क. जम्बुफलम्, कदलीफलम्, परीक्षाफलम्, श्रीफलम्।

ख. गच्छति, धावति, हरिः, खेलति।

ग. पाटलम्, चम्पकम्, दाडिमम्, कमलम्।

घ. पितामहः, मातामहः, अतुलः, मातुलः।

ङ. अद्य, श्वः, अश्वः, परश्वः।

**15. उचितविकल्पं चित्वा लिखत—**

क. स्वामिविवेकानन्दस्य बाल्यकालस्य नाम आसीत्?

(गोरखनाथः/नरेन्द्रनाथः/केदारनाथः/मत्स्येन्द्रनाथः)

ख. शङ्करस्य भूषणम् अस्ति। (सर्पः/चन्द्रः/गङ्गा/विषम्)

ग. आर्यभटः आसीत्। (खगोलशास्त्री/रसायनशास्त्री/शास्त्री/समाजशास्त्री)

घ. दुःखसागरे। (त्वरणीयम्/करणीयम्/तरणीयम्/चरणीयम्)